Kalidasa
Sruta bodha

PK
875
K3
1872

श्रुतबोध

सटीक

AN ELEMENTARY TREATISE

ON

SANSCRIT PROSODY

BY

KALI DASA

पञ्जाब के महाविद्यालय के निमित्त

यूनिवर्सिटी कालेज के मेम्बरों

की अनुमत्यनुसार

Published under the auspices of the

Panjáb University College

LAHORE

विद्यासभा यन्त्र लाहोर मे पण्डित मुकुन्दराम ने छापा।

संवत् १९२८

1872

४०० खण्ड

मूल्य ≠) दो आना

LIBRARY
JUN 16 1969
UNIVERSITY OF TORONTO

ओं

ओंश्रीगणेशायनमः

१ छंदसांलक्षणंयेनश्रुतमात्रेणबुध्यते तमहंकथयिष्यामिश्रुतबोधमविस्तरं । १ । संयुक्ताद्यंदीर्घंसानुस्वारंविसर्गसंमिश्रं विज्ञेयमक्षरंगुरुपादांतस्थंविकल्पेन । २ ।

ओंश्रीगणेशायनमः । श्रीमत्कारस्वतन्वामनत्वास्तुत्वाचसद्गुरुम्टीकाश्रीश्रुतबोधस्यछंदसः क्रियते … । ओंअहंतत्श्रुतबोधंनामछंदःशास्त्रंकथयिष्यामिकथंभूतंअविस्तरंनविद्यतेविस्तारोयस्मिन्तत् तत्किंयेनश्रुतमात्रेणसताप्रस्तारादिनाविनैवछन्दसामार्यानुष्टभादीनांलक्षणंगुरुलघुवर्णमात्रादिस्वरूपंबुध्यतेज्ञायते । १ । अथप्रथमंगुरुलक्षणमाहसंयुक्तेतियदक्षरंसंयुक्ताद्यंसंयुक्तस्यसंयोगभूतस्याक्षरस्याद्यंपूर्ववर्तितदक्षरंगुरुसंज्ञकंज्ञेयं पुनर्यद्दीर्घंतदपिगुरु तद्यथा अ इ उ ऋ ऌ पंचस्वराह्रस्वसंज्ञकाः तथाएतैरुपलक्षितं व्यंजनमपिह्रस्वसंज्ञकं तथा आ ई ऊ ॠ ॡ ए ऐ ओ औ एतेनवस्वरादीर्घसंज्ञकाः तथा एतैरुपलक्षितं व्यञ्जनमपिदीर्घं यद्दीर्घंतद्गुरुसंज्ञं यत्ह्रस्वंतल्लघुसंज्ञं पुनर्यदक्षरं सानुस्वारं अनुस्वारोनकारमकारजोऽक्षरोपरिबिंदुरूपस्तेनसहितमपिगुरुसंज्ञंतथाविसर्गसंमिश्रंद्वौबिंदूविसर्गःतेनसंमिश्रंसंयुक्तंतदपिगुरुसंज्ञकं पादांतस्थंविकल्पेनपादः श्लोकचतुर्थांशस्तस्यांतेवर्त्तमानलध्वक्षरमपिगुरुसंज्ञंविकल्पेनभवतिक्वचिद्गुरुसंज्ञमित्यर्थः …तरुणंसर्षपशाकंनवौदनंपिच्छलानिचदधीनि अल्पव्ययेनसुंदरिग्राम्यजनोमिष्टमश्नाति । २।

यस्याःपादेप्रथमेद्वादशमात्रास्तथातृतीयेपि अष्टादशद्वितीयेचतुर्थकेपंचदशसार्या । ३ । आर्यापूर्वार्धसमंद्वितीयमपिभवतियत्रहंसगते छंदोविदस्तदानींगीतिंताममृतवाणिभाषन्ते । ४ । आर्योत्तरार्धतुल्यंप्रथमार्धमपिप्रयुक्तंचेत् कामिनितामुपगीतिंप्रकाशयंतेमहाकवयः । ५ ।

मात्राछंदस्त्वेनप्रथममार्यालक्षणमाह यस्याइति यस्याःआर्यायाः प्रथमेपादेद्वादशमात्राभवंति तथातृतीयेपिपादेद्वादशमात्राःस्युः द्वितीयेपादेऽष्टादशमात्राःस्युश्चतुर्थेपादेपंचदशमात्रास्युःसाआर्यानामछंदःस्यात् अत्रगुर्वक्षरस्यद्वेमात्रेविज्ञेयेलघ्वक्षरस्यैकामात्रागण्या एवंपादचतुष्टयेपिसप्तपंचाशन्मात्राःप्रमाणमार्या । अत्रसर्वेषुछंदस्सुस्वंस्वंलक्षणंस्वस्मिन्नेवअस्याःगणप्रस्तारोवृत्तरत्नाकरोक्तः लक्ष्मैतत्सप्तगणेतिगाथाद्वयाद्विज्ञेयः अस्याइदमेवोदाहरणंचयथा ०ऽ ऽ०ऽऽ०।।ऽ० १ २।।।०ऽऽ०।ऽ।०ऽऽ०ऽ०२ऽऽ०।ऽ।०ऽऽ० ३।ऽ।०ऽ।।० ०ऽऽ०ऽ०४। इत्यार्याछंदः । ३ । आर्यापूर्वार्द्धेति हेहंसगतेहंसस्यगतिरिवगतिर्यस्याःसाहंसगतिस्तत्संबुद्धौहेहंसगतेप्रिये यत्रयस्मिन्वृत्तेद्वितीयमप्यर्धंआर्यापूर्वार्द्धेनसमंतुल्यंभवतितदानींहेअमृतवाणि अमृतमयावाणीयस्याःतत्संबुद्धौहेअमृतवाणिप्रियेछंदोविदः छंदोज्ञातारस्तांगीतिंनामछंदोभाषन्ते यथार्यायाःपूर्वार्धेत्रिंशन्मात्राः तथात्रापिपूर्वार्द्धेत्रिंशन्मात्राःतथैवद्वितीयेर्धेपित्रिंशन्मात्राःस्युःसाषष्टिमा०ऽत्रागीतिरस्याउदाहरणं ०ऽऽ०ऽऽ०ऽ०१ऽ।०।।।।०ऽ।०ऽ।।०ऽ।०ऽ०२ऽऽ। ।०ऽऽ०३ऽऽ०ऽ।।०।ऽ।ऽऽ०ऽऽ४ इतिगीतिश्छन्दः । ४ । अथोपगीतिः आर्योत्तरार्धेतिहेकामिनिचेद्यदिप्रथमार्द्धमप्यार्य्यायाः उत्तरार्द्धतुल्यंआर्यायाद्वितीयार्धसदृशंप्रयुक्तंकृतंभवति महाकवयस्तांउपगीतिंनामछंदः प्रकाशंतेसाचतुःपंचाशन्मात्राप्रमाणोपगीतिर्यथा ०ऽऽ०।ऽ।०ऽऽ१।ऽ०।ऽ०ऽ०२ऽ।१७।०ऽ।० ऽऽ०३।ऽ।ऽ०ऽ०।०ऽ।०ऽ० ४।५। इत्युपगीतिः छंदः । ५ ।

आदिचतुर्थंपंचमकंचेद्यत्रगुरुस्यात्साक्षरपंक्तिः । ६ । अगुरुचतुष्कंभवतिगुरूद्वौघनकुचयुग्मेशशिवदनासौ । ७ । तुर्यंपंचमकंचेद्यत्रस्याल्लघुबाले विद्भिर्मृगनेत्रेप्रोक्तासामदलेखा । ८ । पंचमंलघुसर्वत्रसप्तमंद्विचतुर्थयोः षष्ठंगुरुविजानीयादेतत्पद्यस्यलक्षणं । ९ । श्लोकेषष्ठंगुरुज्ञेयंसर्वत्रलघुपंचमं द्विचतुःपादयोर्ह्रस्वंसप्तमंदीर्घमन्ययोः । १० ।

अथवर्णछंदांस्याह आदिचतुर्थमिति चेद्यदियत्रपंचाक्षरायांजातौपादेपादेआदिप्रथमाक्षरंतथाचतुर्थंपंचमकंचाक्षरंगुरुस्यात् द्वितीयंतृतीयंचलघुस्यात्साक्षरपंक्तिर्नामछंदः । ६ । ०ऽ।०ऽऽ०१ऽ।।०२ऽ।०ऽऽ०९ऽ।।०ऽऽ०४।।५ अगुरुचतुष्कमिति हेघनकुचयुग्मेघनंमांसलंकुचयोर्युग्मंयस्याः सातत्संबुद्धौहेघनकुचयुग्मेयत्रषडक्षरायांजातौपादेपादेआदौ अगुरुचतुष्कंलघुचतुष्टयंभवत्यग्रेचद्वौगुरूभवतःअसौशशिवदनानामछंदः ०।।।०।ऽऽ०१ इतिषडक्षरजातिः । ७ । तुर्यमितिहेबालेबालास्यात्षोडशाब्देतिवचनात् हेषोडशवार्षिकेचेद्यदियत्रसप्ताक्षरायांजातौतुर्यंचतुर्थंपंचमकंचाक्षरंलघुस्यात्शेषाणिप्रथमद्वितीयतृतीयषष्ठसप्तमाक्षराणिगुरूणिस्युः हेमृगनेत्रेमृगस्यनेत्रइवनेत्रेयस्याः सातत्संबुद्धौहेमृगनेत्रेविद्वद्भिःपंडितैःसामदलेखाप्रोक्ता ०ऽऽ०ऽ,।०ऽऽ१ ०ऽऽ०ऽ।।०ऽऽ०२ऽऽ ०ऽ।।० ०३ ०।।०० ०४ इतिसप्ताक्षराजातिः । ८ । अथाष्टाक्षराजातिःपंचममिति एतत्पद्यसंज्ञकस्यलक्षणंनिष्पन्नंकिंतदित्याह सर्वत्रचतुर्षुचरणेषुपंचममक्षरंलघुस्यात् चतुर्षुपादेषुषष्ठमक्षरंगुरुविज्ञेयमिति इतिपद्यछंदः । ९ । अथश्लोकः श्लोकेषष्ठमिति श्लोकेनुष्टुभिअष्टाक्षरायांजातौसर्वत्रचतुर्ष्वपिपादेषुषष्ठमक्षरंगुरुविज्ञेयमिति चतुर्ष्वपिचरणेषुपंचममक्षरंलघुभवतितथाद्वितीयचतुर्थयोःपादयोःसप्तममक्षरंह्रस्वंलघुभवतिअन्ययोः प्रथमतृतीययोःसप्तममक्षरंदीर्घंगुरुभवति शेषाक्षराणांनियमोन । १० ।

आदिगतंतुर्यगतं पंचमकंचांत्यगतं स्याद्गुरुचेत्तत्कथितं माणव
कक्रीडमिदं । ११ । द्वितुर्यषष्ठमष्टमं गुरुप्रयोजितंयदा तदा
निवेदयंतितां वुधानगस्वरूपिणि । १२ । सर्वेवर्णादीर्घायस्यां
विश्रामःस्याद्वेदैर्वेदैः विद्वद्वृंदैर्वीणाबाणी व्याख्यातासाविद्युन्मा
ला । १३ । तन्विगुरुस्यादाद्यचतुर्थं पंचमषष्ठंचांत्यमुपांत्यं
इन्द्रियबाणैर्यत्रविरामः साकथनीयाचंपकमाला । १४ ।

आदीति अष्टाक्षरायांजातौचेद्यद्यादिगतंप्रथमाक्षरंतथातुर्यगतंचतुर्थंतथापं
चमंतथान्त्यगतमष्टममक्षरंचगुरुस्यात् शेषाणिद्वितीयतृतीयषष्ठसप्तमान्यक्षरा
णिलघूनिस्युः तदिदंमाणवकक्रीडनकंनामछंदः । ११ । द्वितुर्येति अष्टाक्षरा
यामेवजातौयदाद्वितीयंचतुर्थंषष्ठंअष्टमंचाक्षरंगुरुप्रयोजितंगुरुकृतं शेषाणिल
घूनिस्युःतदाबुधाःपंडिताः तांनगस्वरूपिणींनामछंदोनिवेदयंति इतिनगस्व
रूपणीनामछंदः । १२ । सर्वेवर्णाइति अष्टाक्षरायामेवजातौयस्याःसर्वेवर्णाः
पादेपादेअष्टावक्षराणिदीर्घागुरवःस्युःपुनर्वेदैर्वेदैः चतुर्भिःचतुर्भिरक्षरैःविश्रा
मःस्यात् हेबीणाबाणिबीणास्वरवद्वाणीयस्याः सातत्संबुद्धौ हेबीणाबाणि वि
द्वद्वृंदैः पंडितगणैः साविद्युन्मालाव्याख्याता कथिता अस्याःपादेपादेअष्टगु
रवः इतिविद्युन्मालाछंदः । १३ । अथदशाक्षराजातिः तन्वीति दशाक्षरायां
जातौहेतन्विकृशांगियत्राद्यश्चतुर्थंपंचमं षष्ठमंत्यंदशममुपान्त्यंअन्त्यात्पूर्वं नव
माक्षरंगुरुस्यात् शेषाणिद्वितीयतृतीयसप्तमाक्षराणिलघूनिस्युः यत्रेन्द्रियबाणैः
पंचभिःपंचभिरक्षरैःविरामः विश्रामःस्यात्द्विवारंयतिर्भवति साचंपकमा
लाकथनीया । १४ ।

चंपकमालायत्रभवेदंत्यविहीनाप्रेमनिधे छन्दसिदचायेकवयस्त
न्मणिबन्धन्तेब्रुवते । १५ । मन्दाक्रांतांत्ययतिरहितासालंकारे
भवतियदिसा तद्विदङ्भिर्ध्रुवमभिहिताज्ञेयाहंसीकमलवदने ।१६
ह्रस्वोवर्णोजायतेयत्रषष्ठः कंबुग्रीवेतद्वदेवाष्टमांत्यः विश्रामःस्या
त्तन्विवेदैस्तुरंगैस्तांभाषंते शालिनींछान्दसीयाः । १७ ।

अथनवाक्षराजातिः चम्पकमालेति हेप्रेमनिधेप्रेम्णः निधिः तत्संबुद्धौहे० यत्रचंपकमालैवांत्यविहीना अन्त्याक्षररहिताभवतियथाचम्पकमालायांपादेपादेदशाक्षराणिसन्तितानिचांत्याक्षरविहीनानिप्रतिपादंनवनवाक्षराणि पूर्वोक्तलक्षणेनैवभवन्तिछन्दसिछन्दःशास्त्रेदक्षाश्चतुरायेकवयस्तेतन्मणिबंधमितिछन्दोब्रुवते कथयन्ति इतिनवाक्षरायांजातौमणिबंधंनामछन्दः । १५ मंदाक्रांतेति हेसालंकारेसहअलंकारैराभरणैर्वर्त्तते इतिसालंकारातत्संबुद्धौ हे० यदिचेद्वक्ष्यमाणलक्षणामंदाक्रांताएवअंत्ययतिरहिताभवतिहेकमलवदनेसाहंसीनाम्नीज्ञेयायथामंदाक्रांतायांप्रतिपादंसप्तदशाक्षराणि तत्रचतुर्भिरक्षरैरेकायतिस्तदग्रेषड्भिरक्षरैर्द्वितीयायतिस्तदग्रेसप्तभिरक्षरैस्तृतीयायतिरेवंतिस्रोयतयोवक्ष्यतिचतद्वत्रांत्यौयुगरसहयैयत्रकांतेविराम इतितासांमध्यादंत्यासप्ताक्षरमयीयायतिस्तयाहीनादशाक्षरा हंसीज्ञेया इतिदशाक्षरायांजातौ हंसीनामछंदः । १६ । अथैकादशाक्षराजातिः ह्रस्वोवर्णइतिहेकंबुग्रीवेकंबुःशंखस्तद्वद्ग्रीवायस्यास्सातत्संबुद्धौहे ० यत्रैकादशाक्षरायांजातौ षष्ठोवर्णोह्रस्वोजायतेतद्वदेवअष्टमादंत्योनवमोपिह्रस्वोभवति हेतन्विकृशांगियत्रवेदैश्चतुर्भिरक्षरैस्तदग्रेतुरंगैःसप्तभिरक्षरैर्विश्रामोभवति यतिर्भवतिछांदसीयाश्छंदः शास्त्रनिपुणास्तांशालिनीमितिभाषंते इतिशालिनीनाम छंदः । १७ ।

आद्यचतुर्थमहीननितंबे सप्तमकंदशमंचतथांत्यं यत्रगुरुप्रकटस्म रसारे तत्कथितंननुदोधकवृत्तं । १८ । यस्यांत्रिषट्सप्तमचरं स्याद्गुरुसुजंघेनवमंचतद्वत् गत्याविलज्जीकृतहंसकांते तामिंद्रव ज्रांब्रुवतेमुनींद्राः । १९ । यदींद्रवज्राचरणेषुपूर्वे भवंतिवर्णा ल वःसुवर्णे अमंदमाद्यन्मदनेतदानी मुपेंद्रवज्राकथिताकवींद्रैः । २० । यत्रद्वयोरप्यनयोस्तुपादा भवन्तिसीमंतिनिचंद्रकांते विद्वद्भिराद्यैःपरिकीर्त्तितासा प्रयुज्यतामित्युपजातिरेषा । २१ ।

आद्यचतुर्थमिति हेअहीननितंबे अहीनःपुष्टोगुरुःनितंबोयस्याःसाहे० हेप्र कटस्मरसारेप्रकटःप्रादुर्भूतःस्मरस्यसारोयस्याःसातत्संबुद्धौहे० यत्राद्यप्रथमंपु नश्चतुर्थंपुनःसप्तमसत्वरंतथादशमंतथाचांत्यं एकादशमत्वरंचगुरुस्यात्ननुनिश्चि तंतद्दोधकवृत्तंदोधकनामछंदः इतिदोधकछंदः । १८ । यस्यामिति हेसुजंघे सुष्टुशोभनेजंघेयस्याःसातत्संबुद्धौहे ०गत्याविलज्जीकृतहंसकांतेगत्याकृत्वाविल ज्जीकृताहंसस्यकांतिःशोभाययासातत्संबुद्धौहे० यत्रैकादशाक्षरायांजातौत्रिष ट्सप्तमंतृतीयंषष्ठंसप्तमंतद्वत् नवमंचाक्षरंक्रमेणलघुस्यात् शेषाणिगुरूणिस्युःमु नींद्रास्तांइन्द्रवज्रांब्रुवतेकथयन्ति इतीन्द्रवज्रानामछंदः । १९ । यदीतिहेसु वर्णेसुष्टुशोभनोवर्णोयस्याःसातत्संबुद्धौहे० हेअमंदमाद्यन्मदनेअमंदः अधिकः माद्यन्मदोत्कटोमदनोयस्याःसातत्संबुद्धौहे०यदिचतुर्ष्वपिइन्द्रवज्राचरणेषुपू र्वेवर्णाः पादानामादिमायस्त्वारोवर्णालघवोभवन्तिशेषमिन्द्रवज्रावदेवस्यात्त दानींकवींद्रैःउपेंद्रवज्राकथिता इत्युपेन्द्रवज्रानामछंदः । २० । यत्रेति हेसी मंतिनिसीमंतःकेशवेशोऽस्याअस्तीतिसीमंतिनीतत्संबुद्धौहे० हेचंद्रकांतेचंद्रव द्गौराकांतिर्यस्याः सातत्संबुद्धौहे० यत्रानयोःपूर्वोक्तयोरिंद्रवज्रोपेंद्रवज्रयोरपि पादामिश्रिताभवंति सैषाउपजातिरितिप्रयुज्यतांकथ्यता मितीदृशमाद्यैःपं डितैःपरिकीर्तिता इत्युपजातिनामछंदः । २१ ।

आख्यातकीस्यात्प्रकटीकृतार्थे यदींद्रवज्राचरणः पुरास्यात् उपेंद्रवज्राचरणास्त्रयोन्ये मनीषिणोक्ताविपरीतपूर्वा । २२ । आद्य मक्षरमतस्तृतीयकं सप्तमंचनवमंतथांतिमं दीर्घमिंदुमुखियत्रजायते तांवदंतिकवयोरथोद्धतां । २३ । अक्षरंचनवमंदशमंचव्यत्ययाद्भवतियत्रविनीते प्राक्तनैर्यदिमृगेक्षणिसैव स्वागतेतिकविभिःकथितासौ । २४ । सतृतीयकषष्ठमनंतरते नवमंविरति प्रभवंगुरुचेत् घनपीनपयोधरभारनते ननुतोटकवृत्तमिदंप्रथितं । २५ ।

आख्यातकीति हेप्रकटीकृतार्थे प्रकटीकृतोऽर्थेऽभिधेयोययासातत्संबुद्धौ॰ यदि पुराप्रथमःपादःइन्द्रवज्रापादःस्यादन्येऽग्रेतनास्त्रयःपादाःउपेंद्रवज्रायाः भवंतिसामनीषिणापंडितेनविपरीतपूर्वाआख्यातकीकथिता इतिविपरीताख्यातकीनामछंदः । २२। आद्यमिति हेइन्दुमुखिइन्दुवदाह्लादकंमुखंयस्याःसातत्संबुद्धौहे॰ यत्रआद्यंप्रथममक्षरं अतोऽग्रेतृतीयकंचपुनः सप्तमंचपुनर्नवमंतथान्तिममेकादशमक्षरंचदीर्घंजायतेगुरुभवति शेषाणिलघूनिस्युःसुनयःपूर्वाचार्यास्तांरथोद्धतामितिवदंति इतिरथोद्धतानामछंदः । २३ । अक्षरमिति हेविनीतेविनययुक्ते हेमृगेक्षणि मृगस्येक्षण इव ईक्षणेनेत्रेयस्याःसातत्संबुद्धौ यदिरथोद्धतायामेवनवमंचपुनर्दशमंअक्षरंव्यत्ययाद्विपरीतत्वेनभवतियथारथोद्धतायांनवममक्षरंदीर्घंदशमक्षरंह्रस्वं तदत्रव्यत्ययाद्भवति यथानवमंह्रस्वंदशमं दीर्घमित्यर्थः शेषंरथोद्धतावत्तदाप्राक्तनैः कविभिः सैवरथोद्धतैवस्वागतेत्यसौकथिता इतिस्वागतानामछंदः । २४ । सतृतीयकमिति हेअनंतरतेचेद्यदिद्वादशाक्षरायांजातौ सतृतीयकषष्ठंनवमंतृतीयकषष्ठाभ्यांसहवर्त्तमानंनवमं अर्थात् तृतीयकमक्षरंनवमंषष्ठमक्षरंचगुरुस्यात् अथविरतिप्रभवंअंत्यंद्वादशं गुरुस्यादित्यर्थः हेघनपीनपयोधरभारनते घनपीनौकठिनस्थूलौचतौपयोधरौतयोर्भारस्तेननताततसंबुद्धौहे॰ ननुनिश्चितमेतत्तोटकवृत्तमितिप्रथितं ख्यातं इतितोटकनामछंदः । २५ ।

ह्रस्वोवर्णः स्यात्सप्तमोयत्रबाले तद्वद्बिंबोष्ठिन्यस्तएकादशाद्यः वा

णैर्विश्रामोयत्रचेद्वातुरंगै र्नाम्नानिर्दिष्टातत्रसावैश्वदेवी। २६।

यदाद्यंचतुर्थंतथासप्तमंचे त्तथैवाक्षरंह्रस्वमेकादशाद्यं शरच्चंद्र

विद्वेषिवक्त्रारविंदे तदुक्तंकवींद्रैर्भुजंगप्रयातं। २७। यदितो

टकस्यगुरुपंचमकं विहितंविलासिनितदक्षरकं रससंख्यकंगु

रुनचेदवले प्रमिताक्षरेतिकथिताकविभिः। २८।

ह्रस्वइति हेबालेषोडशवार्षिके हे बिंबाकारावोष्ठौयस्याः सातत्संबुद्धौहे० द्वाद शाक्षरायांजातौयत्रसप्तमोवर्णोह्रस्वोलघुःस्यात्पुनरेकादशाद्योदशमोपिवर्णस्त द्वत्सप्तमवत् ह्रस्वएवन्यस्तःस्थापितःस्यात्शेषाःसर्वेगुरवःस्युः चेद्यदितत्रप्रथमंतु वाणैःपंचभिरक्षरैःविश्रामोयतिस्तदग्रेतुरंगैःसप्तभिरक्षरैःविश्रामोयतिःस्यात् सानाम्नाछत्वावैश्वदेवीनिर्दिष्टाकथितेतिवैश्वदेवीनामछंदः। २६। यदाद्य मिति हेशरच्चन्द्रविद्वेषिवक्त्रारविंदेशरदः चंद्रस्यस्पर्द्धित्वाद्विद्वेषिवक्त्रामेवार विंदंयस्याःसातत्संबुद्धौहे० कवींद्रैस्तच्छन्दोभुजंगप्रयातमुक्तं तत्किंयद्यस्मिन् आद्यंप्रथममक्षरंह्रस्वंस्यात् तथाचतुर्थंतथासप्तमंतथा एकादशाद्यंदशमंअक्षरं ह्रस्वंस्यात्तदितिसंबंधःएकादशस्याद्यंदशममित्यर्थः तदुक्तंवृत्तरत्नाकरेभवेद्यै श्चतुर्भिर्भुजंगप्रयातं॥०।ऽऽ०।ऽऽ०।ऽऽ०१ इतिभुजंगप्रयातंनामछंदः। २७। यदीति हेअबलेकविभिः साप्रमिताक्षरेतिकथित।साका हेविलासिनिय दितोटकस्योक्तलक्षणस्यपंचममक्षरंगुरुदीर्घंविहितं कथितंभवति अथचेद्य दितस्यतोटकस्यरससंख्यकं षष्ठसंख्यकमक्षरंगुरुनभवति तोटकनियतल क्षणपंचममक्षरंह्रस्वंभवतिषष्ठमक्षरंदीर्घंअस्यांप्रमिताक्षरायांनियतलक्षणषष्ठं लघुस्यात् पंचमंगुरुस्यात्प्रमिताक्षरातोटकवृत्तमेवानेनविशेषेण नामांतरप्रा प्तं इतिप्रमिताक्षरानामछन्दः। २८।

अयिक्रशोदरियत्रचतुर्थकं गुरुचसप्तमकंदशमंतथा विरतिजंच तथैवविचक्षणै द्रुतविलंवितमित्युपदिश्यते । २८ । प्रथमाक्षर मायहृतीययो द्रुतविलंवितकस्यचपादयोः अपिचेन्नतदाकम लेक्षणे सुकविभिःकथिताहरिणप्लुता । ३० । उपेंद्रवज्राचर णेषुसंतिचे दुपांत्यवर्णालघवःकृतायदि मदोल्लसद्भ्रूजितका मकार्मुके वदंतिवंशस्थमिदंतदाबुधाः । ३१ । यस्यामशोकांकु रपाणिपल्लवेवंशस्थपादाःगुरुपूर्ववर्णकाः तारुण्यहेलारतिरं गलालसे तामिंद्रवंशांकवयःप्रचक्षते । ३२ ।

अयीति अयीतिकोमलालापेहेकांतेविचक्षणैः पंडितैः तद्द्रुतविलंवितंनाम इत्युपदिदिश्यतेकथ्यते तत्किंहेकृशोदरिकृशमुदरंयस्याःसातत्संबुद्धौहे॰यत्र चतुर्थकंसप्तमंदशमंअतःपरंतथैवविरतिजंअंत्यंद्वादशंगुरुस्यात्तत् इतिद्रुतवि लंवितंनामछंदः । २९ । प्रथमेति हेकमलेक्षणेतदासुकविभिःइयंहरिण प्लुताकथिताइयंकाअपीतिकोमलामंत्रेणचेयदिद्रुतविलंवितकस्यछंदसआद्यहृ तीययोः पादयोश्चरणयोःप्रथममक्षरंनभवतिद्रुतलंवितकस्यआद्यश्चरणएकाद शाक्षरः स्यात्तथाहृतीयोप्येकादशाक्षरःस्यात्तदेयंहरिणप्लुतास्यात् इतिह रिणप्लुतानामछंदः । ३० । उपेंद्रवज्रेति हेमदोल्लसद्भ्रूजितकामकार्मु केचेयदिचतुर्ष्वपिउपेंद्रवज्राचरणेषुपादेषु कृताश्चत्वारउपांत्यवर्णाभवंतिअंत्य वर्णेभ्यः पूर्ववर्णालघवःस्युःततोग्रेपरेगुरवश्चतुर्ष्वपिपादेष्वेतेचत्वारोगुरवस्त दाबुधाःतंवृत्तंवंशस्थमितिवदंति उपेंद्रवज्रापादेष्वेकादशोगुरुर्भवतिसोत्रलघु र्भवतितदग्रेएकोन्योगुरुर्देयइत्यर्थः इतिवंशस्थंनामवृत्तं । ३१ । यस्या मिति हेअशोकांकुरपाणिपल्लवेअशोकस्यांकुरइवारुणौपाणीएवपल्लवायस्या ःसातत्संबुद्धौहे॰ यस्यांवंशस्थस्यचत्वारःपादाःगुरुपूर्ववर्णकाःगुरुःपूर्ववर्ण आदिवर्णोयेषांतेईदृग्विधाभवंति हेतारुण्यहेलारतिरंगलालसेतारुण्यस्यहे लयालीलयारतिरंगेसंभोगक्रीडायांलालसाइच्छायस्याःसातत्संबुद्धौहे॰ कव यस्तामिंद्रवंशामितिवदंतिकथयंतिवंशस्थेआदिवर्णोलघुरत्रतुदीर्घ इतिविशे षः इतिइन्द्रवंशनामछंदः । ३२ ।

यस्यांप्रियेप्रथमकमक्षरद्वयं तुर्यंतथागुरुनवमंदशांतिमं सांत्यं
भवेद्यदिविरतिर्युगग्रहैः सालक्ष्यताममृतलतेप्रभवती । ३३ ।
आद्यंचेत्त्रितयमथाष्टसंनवांत्यं चोपांत्यंगुरुविरतौसुभाषितेस्यात्
विश्रामोभवतिमहेशनेत्रै दिग्भिर्विज्ञेयाननुसुदतिप्रहर्षणीसा
। ३४ । आद्यंद्वितीयमपिचेद्गुरुतच्चतुर्थं यत्राष्टमंचदशमांत्यमुपां
त्यमंत्यं कामांकुशांकुशितकामिमतंगजेंद्रे कांतेवसंततिलकां
किलतांवदंति । ३५ ।

यस्यामिति हेप्रियेत्रयोदशाक्षरायांजातौयस्यांप्रथममाद्यौवर्त्तमानमक्षरद्वयं तथाचतुर्थंतथानमं तथादशांतिमंएकादशंसान्त्यंअन्त्येनत्रयोदशेनसहितंगुरुभवतिशेषाणिलघूनिस्युः चेद्यदियुगग्रहैश्चतुर्भिर्नवभिश्चयतिर्विश्रामःप्रथमयतिश्चतुर्भिरक्षरैःद्वितीयानवभिःस्यात्हेअमृतलतेऽमृतवत्ल्यसौप्रभवतीतिनाम्नात्वयालक्ष्यतांज्ञायतां इतिप्रभवतीनामछंदः । ३३ । आद्यमिति हेसुभाषितेसुष्टुशोभनंभाषितंजल्पितंयस्याःसातत्संबुद्धौहे॰ चेद्यद्याद्यंत्रितयंपादादौवर्त्तमानमक्षरत्रयंगुरुस्यात् अथअष्टमंतथानवांत्यंदशमंचगुरुस्यात्विरतौअंत्येयुग्ममक्षरद्वयंचगुरुस्यात् महेशनेत्रैस्त्रिभिर्दिग्भिर्दशभिश्चाक्षरैःविश्रामःत्रिभिःप्रथमःदशभिःद्वितीयःस्यात् हेसुदतिशोभनदंतेननुनिश्चितंसाप्रहर्षणीतिविज्ञेया इतिप्रहर्षणीनामछंदः । ३४ । आद्यमिति कामाङ्कुशेनांकुशितीवशीकृतःकामीएवमतंगजेंद्रोययासातत्संबुद्धौ हेकामांकुशांकुशितकामिमतंगजेंद्रेचतुर्दशाक्षरायांजातौचेद्यदिआद्यंप्रथमाक्षरंतथाद्वितीयंचतुर्थंअष्टमंदशमादंत्यंएकादशंतयोपांत्यंअंत्यात्प्रथममक्षरंतथांत्यंचगुरुस्यात् शेषाणिलघूनिस्युःकिलेतिनिश्चयेबुधाः तांवसंततिलकांवदंतिकथयंति इतिवंसंततिलकानामछंदः । ३५ ।

प्रथममगुरुषट्कंविद्यतेयत्रकांते तदनुचदशमंचेदक्षरंद्वादशांत्यं। गिरिभिरथतुरंगैर्यत्रकांतेविरामः सुकविजनमनोज्ञामालिनी साप्रसिद्धा । ३६ । सुमुखिलघवःपंचप्राद्यास्ततोदशमांतिमंत दनुललितालापेवर्णौयदित्रिचतुर्दशौ । भवतिचपुनर्यत्रोपांत्यः स्फुरत्कंकणेयतिरपिरसैर्वेदैरश्वैःस्मृताहरिणीतिसा । ३७ ।

प्रथममिति हेकांतेपंचदशाक्षरायांजातौ चेद्यदिप्रथमंषट्कंअगुरुस्यात्ल घुभवति तदनुपश्चाद्दशममक्षरंतथाद्वादशदंत्यंत्रयोदशमक्षरंअगुरुलघुस्याच्छे षाणिअजराणिगुरुणिस्युः अथगिरिभिरष्टभिरथेतुरंगैःसप्तभिरक्षरैर्विश्रा मःस्यात् हेकांतेसामालिनीतिप्रसिद्धालोकेविख्याताकीदृशीसाकविजनम नोज्ञासुष्टुशोभनाःयेकवयस्तेषांमनोज्ञामनोहरा इतिमालिनीनामछंदः । ३६ । सुमुखीति हेसुमुखिसुमुखंशोभनंसुखंयस्याःसातत्संबुद्धौहे० हेललि तालापे मनोहरआलापोजल्पनंयस्याःहेस्फुरत्कंकणेस्फुरंतःशब्दायंतःक रयोःकंकणाःयस्याःसातत्संबुद्धौहे० सप्तदशाक्षरायांजातौयदिचेत्प्राद्याःआ द्याःपंचवर्णाःलघवःस्युःततोदशमादंतिमः एकादशोऽपिलघुःतदनुपश्चाद्यदित्रि चतुर्दशौत्रयोदशचतुर्दशौवर्णौलघूभवतः पुनर्यत्रउपांत्यःअंत्यादंत्यःषोडशोऽ पिवर्णोलघुर्भवतियतिरपिविश्रामोपिरसैःषड्भिरक्षरैस्तदग्रेवेदैश्चतुर्भिरक्षरैः चपुनःतदग्रेअश्वैःसप्तभिरक्षरैर्भवतिसाहरिणीतिनाम्नास्मृता कथिता इतिह रिणीनामछंदः । ३७ ।

यदाऋस्व:पूर्व:कलितकमलेषष्ठकपरास्ततोवर्णा: पंचप्रकृतिसुकु
मारांगिलघव: त्रयोऽन्येचोपान्त्या:सुतनुजघनाभोगसुभगे रसैरो
शैर्यस्यांभवतिविरति:साशिखरिणी । ३८ । द्वितीयमलिकुंत
लेयदिषडष्टमंद्वादशं चतुर्दशमथप्रियेगुरुगभीरनाभिहृदे सपं
चदशमांत्यजंतदनुयत्रकांते गिरीन्द्रफणिभृत्कुलैर्भवतिसुभ्रुपृथ्
वीहिसा । ३९ । चत्वार:प्राक्सुतनुगुरवोद्वौदशैकादशौचेत् मुग्
धेवर्णौतदनुकुमुदामोदिनिद्वादशांत्यौ तद्वच्चांत्यौयुगरसहयैर्यत्र
कांतिविरामोमंदाक्रांतां प्रवरकवयस्तन्वितांसंगिरंति । ४० ।

यदेति हेकलितकमलेकलितंगृहीतंलीलार्थंकमलंययासातत्संबोधनेहे॰हेप्र
कृतिसुकुमारांगिप्रकृत्यास्वभावेनसुकुमारंकोमलमंगंयस्या:सा तत्संबुद्धौहे॰
हेसुतनुसुभगांगि हेजघनाभोगसुभगे जघनयोर्मध्ययोर्भोगस्थानं तस्मिन्सु
भगेसुंदरेयदिप्राच्यआदिमोवर्ण: ततोग्रेषष्ठेकात्परोवर्त्तमाना:पंचवर्णा:सप्ताष्ट
मनवमदशमैकादशा:पंचवर्णा:ऋस्वा:स्यु: चपुन:अन्येअंत्यवर्णात्पूर्वेत्रय:लघव:
स्यु: यस्यांरसै:षड्भिस्तदग्रेईशैरेकादशभिरक्षरैर्विश्राम:स्यात्सुत्ता इतिशि
खरणीनामछंद: । ३८ । द्वितीयमिति हेअलिकुंतलेअलिवत्श्यामा:कुंत
ला:केशपर्याया:यस्या:सातत्संबुद्धौहे॰ हेप्रियेहेगुरुगभीरनाभिहृदे गुरुर्गरि
ष्टोगभीरश्चनाभिरेवहृदोयस्या:सातत्संबुद्धौहे॰ यदिद्वितीयमक्षरंतथाषडष्ट
मंषष्टंअष्टमंतथाद्वादशमथचतुर्दशंतदनुपंचदशेनसहितंअंतिमं सप्तदशंचा
क्षरंगुरुभवतिशेषाणिलघूनिस्यु: हेकांतेयत्रगिरींद्रफणिभृत्कुलैर्यतिरत्रगिरीं
द्राअष्टकुलाचला:तैरष्टभिरक्षरै: प्रथमायति:तदग्रेफणिभृत्कुलैर्नवभिरक्षरै
र्द्वितीयायतिर्भवतिसापृथ्वीनाम्नाकथिता इतिपृथ्वीनामछंद: । ३९ । च
त्वारइति हेसुतनुहेमुग्धेहेसुंदरिहेकुमुदामोदिनिकुमुदस्यामोदइवामो
दोयस्या:सा तत्संबुद्धौहे॰ यत्रप्राक्पूर्वेचत्वारोवर्णा:अथोग्रेद्वादशैकादशौवर्णौ
तदनुद्वादशांत्यौत्रयोदशचतुर्दशौवर्णौएतेगुरव:स्यु:तद्वच्चांत्यौषोडशाक्षरसप्तद
शाक्षरौगुरुभवत:शेषालघव:स्युस्तथाचहेकांतेयत्रयुगरसहयै र्युगै ४ रसै ६ ह
यैरक्षरैर्विश्राम:स्यात्प्रवरकवयस्तांमंदाक्रांतांसंगिरंति । ४० ।

आद्याश्चेद्गुरवस्त्रय:प्रियतमेषष्ठस्तथाचाष्टम: संत्येकादशतस्त्रयस्तदनुचेदष्टादशाद्योपरौ मार्त्तंडैर्मुनिभिश्चयत्रविरति:पूर्णेन्दुबिंबानने तद्वृत्तंप्रवदंतिकाव्यरसिका:शार्दूलविक्रीडितं । ४१ । चत्वारो यत्रवर्णा:प्रथमममलधव:षष्ठक:सप्तमोपि द्वौतद्वत्षोडशाद्यौमृगमदमुदितेषोडशांत्यौतथांत्यौ रंभास्तंभोरुकांतेमुनिमुनिमुनिभिर्दृश्यतेयद्विरामो बालेवंद्यै:कवींद्रै:सुदतिनिगदितास्रग्धरेयंप्रसिद्धा । ४२ । इतिश्रीपंडितवररत्नविरचित:श्रुतबोधाख्य: छंदोग्रंथ:समाप्त: ॥

आद्यादिति हेप्रियतमे यतिशयेनप्रियेएकोनविंशत्यक्षरायांजातौचेद्यदिपूर्वेत्रयोवर्णा:तत:षष्ठ:तदनुअष्टम: ततएकादशादयेत्रयोवर्णाद्वादशत्रयोदशचतुर्दशा:गुरव:स्यु स्तदनु पश्चादष्टादशाद्वर्णादाद्योद्वौषोडशसप्तदशवर्णौगुरुभवत: तथांत्योपिगुरुरेवशेषालघव:स्यु:पुनर्यत्रमार्त्तंडैर्द्वादशभिरक्षरैरेकातदग्रेमुनिभि: सप्तभिरक्षरै द्वितीयायति:स्यात् हेपूर्णेन्दुबिंबानने पूर्णश्चासाविन्दु: पूर्णेन्दु स्तस्य बिंबंमंडलंतद्वदाननंयस्या:सातत्संबुद्धौहे॰ काव्यरसिका काव्यरसज्ञाजनातत्शार्दूलविक्रीडितंनामछंद:प्रवदंतिकथयंति इतिशार्दूलविक्रीडितंनामछंद: । ४१ । चत्वारइति हेमृगमदमुदितेएकविंशत्यक्षरायांजातौयत्रप्रथमंआदौचत्वारोवर्णास्तदग्रेषष्ठ:सप्तम: तदग्रेतावत्षोडशाद्यौद्वौचतुर्दशपंचदशौवर्णौतदग्रेषोडशादंत्यौद्वौसप्तदशाष्टादशावरौतदग्रेपादस्यांतेवर्त्तमानौविंशतिएकविंशतितमौद्वौवर्णौएतेगुरव:स्यु:शेषलघव:स्यु: हेरंभास्तंभोरुकांते रंभाया:कदल्या:स्तंभवदूरुस्तथाकांतामनोहरातत्संबुद्धौहे॰ चेद्यदिमुनिमुनिमुनिभिस्त्रि:सप्तवारंसप्तभि:सप्तभिरक्षरैर्विरामोविश्रामोभवति हेबालेषोडशाब्दे हेसुतनुसुंदरांगिकवींद्रै:सास्रग्धरेतिनिगदिताकथिता किंभूतै: कवींद्रै:पूज्यै:वंद्यै:कीदृशस्रग्धराप्रसिद्धालोकेविख्याता इतिस्रग्धरा नामछंद: । ४२ । यद्यपिछंदांसिवर्त्तंतेपरमत्रप्रसिद्धान्येवकानिचिदुक्तानिअन्यानिवृत्तरत्नाकरादिभ्योवसेयानि इतिश्रीश्रुतबोधटीकासुबोधिनीसमाप्ता।

लक्षण	देवता	फल	
ऽऽऽ	भूमिः	लक्ष्मी	मगण
ऽ।।	चंद्रः	कीर्त्ति	भगण
।ऽऽ	जलं	अभ्युदय	यगण
।।।	स्वर्गः	चिरायु	नगण
।।ऽ	वायुः	विदेश	सगण
ऽऽ।	व्योम	राज्य	तगण
ऽ।ऽ	अग्नि	मृति	रगण
।ऽ।	सूर्य्य	रोग	जगण

लक्ष्मींमस्त्रिगुरुः क्षितिर्वितनुतेभः पू
र्वगश्चन्द्रमाः कीर्तिंयोभ्युदयंपयः प्रथम
लोनःस्वश्चिरायुस्त्रिलः वायुः सोन्तगुरु
र्विदेशगमनंराज्यंनभस्तोन्तलोरोग्निर्म
ध्यलघुर्मृतिंदिनमणिर्मध्येगुरुर्जोरुजः
अथान्तरे मस्त्रिगुरुस्त्रिलघुश्चनकारो
भादिगुरुःपुनरादिलघुर्यः जोगुरुमध्य
गतोरलमध्यःसोन्तगुरुः कथितोन्तल
घुस्तः २

PK 875 K3 1872

Kalidasa
Sruta bodha

[redacted]

PLEASE DO NOT REMOVE
CARDS OR SLIPS FROM THIS POCKET

UNIVERSITY OF TORONTO LIBRARY